Postal Regd.No. GAMC- 1553/2016-2018 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १२ अङ्क : १४०
जान्युआरी - २०१८

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2016-2018 issued by SSP Ahmedabad. Valid upto 31-12-2018. containing 8 pages ₹10

## चिन्तनम्

### मित्रभावस्य उदयः

प्रतिदिनं प्रभाते स्नानागारे मस्तकं क्षालयन् मनुष्यः मस्तिष्कस्य क्षालनं विस्मरति। अस्माकं मस्तिष्के अवकरस्य आवर्जनम् अहोरात्रं प्रवर्तते। एतादृशं मलीमसं मस्तिष्कं परदूषणे सदा व्यापृतं भवति। ततः ईर्ष्यायाः दुर्गन्धः दिक्षु कामं प्रसरति। बहवः सरलाः सज्जनाः इर्ष्यामुक्तिम् इच्छन्ति, किन्तु उपायं न पश्यन्ति। एते सज्जनाः उपायात् पूर्वं द्वेषस्य उत्पत्तिस्थानं जानीयुः। वस्तुतः ईर्ष्यायाः कारणम् अपर्याप्तिः अथवा अपूर्णता अस्ति। कस्यचित् वस्तुनः स्वामी अन्यः अस्ति, अहं नास्मि इति प्रतीपः मनोग्राहः ईर्ष्यां जनयति। यथा हि तेजोमयं भवनं, मनोजवं यानं, रूपवती नारी वा ईर्ष्यायाः कारणं भवितुम् अर्हति।

पूर्णतां प्रति शनैः शनैः सरन्तः वयं सर्वे अपूर्णाः एव स्मः। अतः वयम् ईर्ष्यां निःशेषं कर्तुं नापि शक्नुयाम। परन्तु तां सह्यां निश्चयेन कर्तुं शक्नुमः। तदर्थं त्रयः मार्गाः पुरतः वर्तन्ते – ज्ञानमार्गः, कर्ममार्गः भक्तिमार्गः च। तेषां भक्तिमार्गः सरलतमः प्रतिभाति।

भक्तस्य हृदयं प्रभुभावेन परिपूर्णं भवति। तस्मात् तत्र ईर्ष्यायाः स्थानम् एव न अवशिष्यते। भक्तः स्वीयाम् अपूर्णताम् अपि आत्मभावेन पूरयति। एवम्भूते ईर्ष्यायाः बाणान् अस्यन्तः दुर्धर्षाः दुर्जनाः अपि पराजयन्ते।

भगवन्तं बुद्धं कश्चित् दुर्मुखः मनुष्यः परुषाणि वचनानि उक्तवान्। बुद्धः किमपि न घटितम् इव तूष्णीं स्थितः। बुद्धस्य शून्येन प्रतिभावेन सः मनुष्यः विस्मयं गतः। बुद्धः तं बोधितवान् – 'भवान् कस्मैचित् पारितोषिकं प्रेषयति, परन्तु सः न स्वीकुर्यात् चेत् किं भवति ?' सः उक्तवान् – 'पारितोषिकं पुनः प्राप्नोमि अहम्।' बुद्धः अवदत् – 'अहमपि भवता प्रेषितं गालिं न गृहीतवान्।'

शत्रुम् अपि मित्रं कर्तुं विशिष्टां कलां भक्तः जानाति। ततः ईर्ष्याभावात् मित्रभावस्य उदयः भवति। मित्रभावेन पूर्णस्य भक्तस्य शब्दकोशे 'शत्रु' शब्दः न विद्यते। अजातशत्रोः अपि शत्रवः दृश्यन्ते। श्रीकृष्णः अपि अत्र मुक्तः न आसीत्। किन्तु अजातशत्रुः भक्तः नितराम् ईर्ष्यामुक्तः भवति इति निश्चितम्।

सतीशः गज्जर्

## ज्ञानसरिता



**किमर्थं शुनकेषु विधेयता अधिका ?** शिक्षणं प्राप्तवन्तः शुनकाः विधेयाः भवन्ति चेत् न तत्र आश्चर्यम् । किन्तु ग्राम्याः अपि शुनकाः स्वामिनिष्ठाः, विधेयाः च भवन्ति इति तु आश्चर्याय । मार्जाराः मानवप्रियाः न । किन्तु शुनकाः मानवप्रियाः । तत्र कारणम् अपि अस्ति । शुनकाः वृककुलसम्बन्धिनः । वृकाः च समूहजीविनः । तत्र तैः नायकविषये विधेयता प्रदर्शनीया एव भवति । तत्कुलजाः शुनकाः अपि यदा गृहं प्रविशन्ति तदा तत्रापि ते गृहस्वामिनं नायकं मन्यन्ते, तद्विषये विधेयतां दर्शयन्ति च । मार्जाराः तु मृगयावृत्तिजीविनः । गृहे वासम् एव सुरक्षायै मन्यन्ते ते । स्वतन्त्रतया वासं कर्तुम् इच्छन्तः ते कस्यापि विषये विधेयतां प्रकाशयितुं न इच्छन्ति ।

**हिक्का** – हासः किञ्चन उत्तमम् औषधम् । एषु दिनेषु 'हासचिकित्सा' इति वचनम् आधिक्येन श्रूयते । एषा चिकित्सा मनसः भारम् अपाकरोति ।यथा अधिकस्य आहारस्य सेवनम् अनानुकूल्याय भवति तथा एव अधिकः हासः अपि कष्टाय एव । यदा हासाधिक्यं भवति तदा शरीरमध्ये निग्रहशैथिल्यं जायते । ततश्च सङ्कोचः, वाचिकाङ्गे शीघ्रस्पन्दः च सम्पद्यते । तस्मात् हिक्कायाः उत्पत्तिः । समीचीनः श्वासनिग्रहः हिक्कानिवारणाय स्थितः सरलः मार्गः । एतस्मात् अङ्गाराम्लवायुः शरीरे सङ्गृहीतः भवति । एषः वायुः हिक्कोत्पत्तिं निगृह्णाति । अमेरिकादेशीयः लोवाप्रदेशीयः चार्ल्स् ओस्बर्न्वर्यः प्रतिनिमेषं ४६ हिक्कां कुर्वन् ६९ घण्टा यावत् निरन्तरं हिक्कितवान् । एषः एव जागतिकः विक्रमः ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **विपाकः** | खाना पकाना | cooking |
| **विपाटनम्** | उखाड़ना | eradication |
| **विपादिका** | पहेली | a riddle |
| **विपिनम्** | वन | forest |
| **विप्रः** | ब्राह्मण | Brãhmana |
| **विप्रकर्षः** | दूरी | distance |
| **विप्रकीर्णः** | बिखरा हुआ | scattered |
| **विप्रतिपत्तिः** | एतराज | objection |
| **विप्रतिषेधः** | दो हितों का संघर्ष | conflict of to interests |
| **विप्रयुक्तः** | पृथक् किया हुआ | separated |
| **विप्रयोगः** | विछोह | separation |
| **विप्रवासः** | परदेस में रहना | staying abroad |
| **विप्रियम्** | अरुचिकर कार्य | disagreeable act |
| **विप्लवः** | विनाश | devastation |
| **विबन्धः** | बाधा | obstrucation |

## किं भवन्तः जानन्ति ?

**१ ) महाभारतस्य रचना कस्मिन् छन्दसि वर्तते ?**
(क) अनुष्टुप् (ख) हरिगीतिका (ग) भुजङ्गप्रयात (घ) रोला

**२ ) जरासन्धस्य वधाय श्रीकृष्णभीमाभ्यां सह कः गतवान् आसीत् ?**
(क) सात्यकिः (ख) धृष्टद्युम्नः (ग) युधिष्ठिरः (घ) अर्जुनः

**३ ) खाण्डववनदाहसमये अर्जुनः केन सह युद्धमकरोत् ?**
(क) तक्षकेन (ख) मयासुरेण (ग) इन्द्रेण (घ) दुर्योधनेन

**४ ) लाक्षागृहस्य निर्माणस्य दायित्वं कस्य आसीत् ?**
(क) कणिकस्य (ख) पुरोचनस्य (ग) प्रतिकमिनः (घ) सञ्जयस्य

**५ ) कुन्त्यै देवतानाम् आवाहनस्य मन्त्रः केन प्रदत्तः आसीत् ?**
(क) दुर्वाससा (ख) वेदव्यासेन (ग) धौम्पेन (घ) किन्दमेन

**६ ) दुर्योधनस्य अन्तिमः सेनापतिः कः आसीत् ?**
(क) शल्यः (ख) अश्वत्थामा (ग) कर्णः (घ) कृपाचार्यः

**७ ) उत्तरायाः गर्भस्थं मृतबालं कः पुनर्जीवयत् ?**
(क) महर्षिव्यासः (ख) नारदः (ग) श्रीकृष्णः (घ) युधिष्ठिरः

उत्तराणि – (१) क (२) घ (३) ग (४) ख (५) क (६) ख (७) ग